# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-१ ( Sem_2 )** **प्रश्नपत्र-४** **गुणाः - ७०**

**विषयः - पौरोहित्यम्** OE 1.2.2 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः - २१-०४-२०१६** **सन्दर्भग्रन्थः - ब्रह्मनित्यकर्मसमुच्चयः**

---

**युनिट-१**

**प्रश्नः -१** पुण्याहवाचने वरुणावाहनपूजनं यथाग्रन्थं लिखन्तु । ०८

**अथवा**

भूमिस्पर्शात् आरभ्य पञ्चपल्लवप्रक्षेपपर्यन्तं समन्त्रं लिखन्तु ।

**प्रश्नः -२** अधः स्तनेषु द्वयोः पूर्तिं विधाय व्याख्या विधेया । ०८

*(१) त्रीणिपदाविचक्रमे . . . . . । (२) सवितात्वा सवाना . . . . . ।*

*(३) नतद्रक्षाःसिन . . . . . । (४) दीर्घायुस्त ओषधे . . . . . . ।*

**प्रश्नः -३** **द्वयोः टिप्पणी कार्या ।** ०४

*(१) ब्राह्मणानां हस्ते सुप्रोक्षितादिकरणम् । (२) पात्रे उदकसेकः ।*

*(३) अभिषेकः । (३) स्वस्तिमन्त्रः ।*

**प्रश्नः -४** **अधोलिखितेषु पञ्चानामुत्तरं लिखत ।** ०५

*(१) कलशे गन्धप्रक्षेपः केन मन्त्रेण भवति ?*

*(२) अष्टदलोपरि कस्य स्थापनं भवति ?*

*(३) पञ्चपल्लवप्रक्षेपः केन मन्त्रेण कर्तव्यः ?*

*(४) 'शिवाः आपः सन्तु' इत्यस्य कोऽर्थः ?*

*(५) हिरण्यगर्भः इति मन्त्रेण किं प्रक्षितव्यम् ?*

*(६) कलशे कस्य पूजनं भवति ?*

*(७) 'द्रविणोदाः' इति शब्दस्य कोऽर्थः ?*

**युनिट-२**

**प्रश्नः -५** **गौर्यादि मातृकापूजने गौरीं आरभ्य देवसेनावाहनं समन्त्रकं प्रतिपादयत ।** ०८

**अथवा**

**सप्तवसोर्द्धारापूजनं समन्त्रकं प्रतिपादयत ।**

**प्रश्नः -६** अधः स्तनेषु द्वयोः पूर्तिं विधाय व्याख्या विधेया । ०८

*(१) ॐ स्वाहायज्ञं मनसः . . . . । (२) ॐ धृष्टिरस्य पाग्ने . . . . . ।*

*(३) ॐ त्वष्टातुरीपो . . . . . . . । (४) ॐ कदाचनस्तरीरसि . . . . . . ।*

**प्रश्नः -७** **कस्यचिदेकस्य टिप्पणीं लिखत ।** ०२

*(१) मण्डपमातृकापूजनम् । (२) आयुष्यमन्त्रजपः ।*

**प्रश्नः -८** **अधः स्तनेषु द्वयोः उत्तरं लिखत ।** **०२**

*(१) मण्डपमातृकानामानि लिखत ।*

*(२) के षड् विघ्नविनायकाः ?*

*(३) 'स्थिरोभववीड्वङ्ग' इति मन्त्रेण किं कर्तव्यम् ?*

**युनिट-३**

**प्रश्नः -९** **वैश्वदेवसंकल्पमहत्वं प्रतिपाद्य यथाशास्त्रं संकल्पविधिं प्रतिपादयत ।** **०८**

**अथवा**

**वैश्वदेवकर्मविधिं समन्त्रकं वर्णयत ।**

**प्रश्नः -१०** **अधः स्तनेषु द्वयोः पूर्तिं विधाय प्रयोगविधिं प्रदर्शयत ।** **०८**

*(१) ॐ आमावाजस्य . . . . . . ।* *(२) ॐ वाजे वाजे वतवाजिनो . . . . ।*

*(३) ॐ यदाबद्ध्नन्दाक्षायणा . . ।* *(४) ॐ मधुवातारेतायते . . . . . . . . ।*

**प्रश्नः -११** **एकां टिप्पणीं लिखत ।** **०४**

*(१) नान्दीश्राद्धम् ।* *(२) आशीषोग्रहणम् ।*

**प्रश्नः -१२** **अधोलिखितेषु पञ्चानामुत्तरं लिखत ।** **०५**

*(१) 'परिवाजपतिः' इति मन्त्रेण किं प्रक्षितव्यम् ?*

*(२) वैश्वदेवसंकल्पे कानि कानि दातव्यानि ?*

*(३) के सप्तचिरंजीविनः ?*

*(४) 'अतिथिश्च लभेमहि' इत्यस्य कोऽर्थः ?*

*(५) सत्यवसुनाम् आवाहनं कुत्र भवति ?*

*(६) अभिषेके पत्न्याः स्थानं कुत्र ?*

*(७) कंङ्कणबन्धनस्य को मन्त्रः ?*

---------------------